# संस्कृत-वार्ता:

दिनाङ्क : 24/11/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- न्यायमूर्ति: सूर्यकान्त: अद्य भारतस्य त्रि-पञ्चाशत-तमीय-न्यायाधीशत्वेन शपथ-वचनम् अङ्गीकृतवान्। राष्ट्रपति: द्रौपदी-मुर्मु: अद्य न्यायमूर्तये सूर्यकांताय पद-गोपनीयताया: शपथविधा स्वीकारितवती।
- राष्ट्रीय महिला आयोगेन संकटग्रस्त महिलाभ्य: त्वरित-अधिकं सुलभ-सहायतां सुनिश्चेतुं नूतन नि:शुल्क-सहायता दूरभाष संख्या - एकम्-चत्वारि-चत्वारि-नव-शून्यम् इति प्रारब्धम्।
- नौ सेनायाम् अद्य मुम्बई-स्थित-नौ सेना पनडुब्बी-रोधी-माहे एतस्यां श्रेण्यां प्रथम-स्वदेशी युद्धपोतस्य आई एन एस माहे इत्यस्य जलावतरणं जातम्।
- भारतीयचलच्चित्रस्य वरिष्ठाभिनेता धर्मेन्द्रः अद्य प्रातः दिवङ्गतः, राष्ट्रपतिः, उपराष्ट्रपतिः तथा प्रधानमन्त्री नरेन्द्रमोदी च अभिनेतु: धर्मेन्द्रस्य निधने शोकं प्रकटितवन्तः।
- स्टैण्डर्ड् एण्ड पूअर्स इत्यनया संस्थया वैश्विक-मूल्याङ्कने वर्तमान-वित्तीयवर्षे भारतस्य अर्थव्यवस्थायाः वृद्धिः पञ्चदशमलवोत्तर षट् प्रतिशतम् उल्लिखितम्।
- शूटिंग स्पर्धायाम् अद्य प्रांजलि प्रशान्त धूमल इत्यनया टोक्यो नगरे आयोजिते पञ्चविंशति-तमे डेफलिम्पिक्स प्रतियोगितायां स्वर्ण पदकं विजितम्।

---

<u>न्यायमूर्ति:</u>

न्यायमूर्ति: सूर्यकान्त: अद्य भारतस्य त्रि-पञ्चाशत-तमीय-न्यायाधीशत्वेन शपथ-वचनम् अङ्गीकृतवान्। राष्ट्रपति: द्रौपदी-मुर्मु: अद्य राष्ट्रपति भवने-न्यायमूर्तये सूर्यकांताय पद-गोपनीयताया: शपथविधा स्वीकारितवती। न्यायमूर्तिना सूर्यकान्तेन न्यायमूर्ति: बी.आर. गवई वर्यस्य स्थानं स्वीकृतम्। शपथग्रहण-कार्यक्रमे अस्मिन् उपराष्ट्रपति: सी.पी. राधाकृष्णन्,

प्रधानमन्त्री नरेन्द्रमोदी, लोकसभा अध्यक्ष: ओम बिरला, केन्द्रीयमन्त्री अमित शाह:, राजनाथसिंह:, जे.पी. नड्डा, अन्य गणमान्य जना: उपस्थिता: आसन्।

न्यायमूर्ति: सूर्यकान्त: द्वि-षष्ट्युत्तर-नवदश-शत-तमे-वर्षे हिसार-हरियाणायां जन्म लब्धवान्। चतुराशीत्युत्तर-नवदश-शत-तमे-वर्षे हिसार-जनपदे सूर्यकान्त: न्यायस्य यात्रा प्रारब्धवान्। मई मासे नवदशोत्तर- द्वि-सहस्रतमे वर्षे असौ सर्वोच्च-न्यायालयस्य न्यायाधीश-पदम् अलङ्कृतवान्। भारतस्य मुख्य-न्यायाधीश-रूपेण न्यायमूर्ते: सूर्यकान्तस्य कार्यकाल: पञ्चदश-मासात्मको भविष्यति।

------------------------------------------

## महिला हेल्पलाइन

राष्ट्रीय महिला आयोगेन, संकटग्रस्त महिलाभ्य: त्वरित-अधिकं सुलभ-सहायतां सुनिश्चेतुं नूतन नि:शुल्क-सहायता दूरभाष संख्या - एकम्-चत्वारि-चत्वारि-नव-शून्यम् इति प्रारब्धम्। एकस्मिन् वक्तव्ये आयोग: प्रतिपादितवान् यत् एषा नि नि:शुल्क-सहायता दूरभाष संख्या आयोगस्य साम्प्रतिकी संख्यात: सम्पृक्ता अस्ति। एषा संख्या हिंसा-उत्पीडितानां महिलानां कृते प्रसारिता अस्ति।

------------------------------------------

## नौसेना-माहे

नौ सेनायाम् अद्य मुम्बई-स्थित-नौ सेना पनडुब्बी-रोधी-माहे एतस्यां श्रेण्यां प्रथम स्वदेशी-युद्धपोतस्य **आई एन एस माहे** इत्यस्य जलावतरणं जातम्। सेनाध्यक्षेण जनरल उपेन्द्र द्विवेदिना समारोहस्य अस्य अध्यक्षता निर्व्यूढा। एष: जलोपयोगी स्वदेशी युद्धपोत: वर्तते। अस्य निर्माणं कोचीन-शिपयार्ड-लिमिटेड इत्यनेन कृतमस्ति। एष: आत्मनिर्भर-पदक्षेपस्य अन्तर्गते पोत-निर्माण-तन्त्रे भारतस्य विवर्धित-क्षमताया: प्रतीको विद्यते। युद्धपोते अस्मिन् अशीत्यधिक स्वदेशी-सामग्री प्रयुक्ता अस्ति। आत्मनिर्भर-भारतस्य अयं पदक्षेप: प्रशंसनीयो विद्यते।

-

-----------------------------------------

**धर्मेन्द्रः**

भारतीयचलच्चित्रस्य अत्यन्तं प्रियाभिनेतृषु अन्यतमः वरिष्ठाभिनेता धर्मेन्द्रः अद्य प्रातः एकोनाशीतिः वयसि मुम्बै-निवासस्थाने दिवङ्गतः। सुप्रसिद्धः अभिनेता तथा संसदः पूर्वसदस्यः, यः स्वास्थ्यसमस्याभिः पीडितः आसीत् तथा अस्य मासस्य आरम्भे ब्रीच कैण्डी चिकित्सालये प्रवेशितः आसीत्, सः षट्भ्यः अपि अधिकानि अविस्मरणीयानि दशकानि यावत् विस्तृतं परम्परां त्यक्तवान्। अस्याः वार्तायाः पुष्टिं कुर्वन् भावपूर्णायां इन्स्टाग्राम्- इति सामाजिकान्तर्जालीय सन्देशे चलचित्र-निर्देशक-निर्माता च करण जोहरः धर्मेन्द्रस्य निधनं "एकस्य युगस्य समाप्तिः" इति वर्णितवान्। प्रेम्णा बालिवुड-इत्यस्य ही-मैन तथा धरम-पाजी इति नाम्ना ख्यातः धर्मेन्द्रः तादृशः जनः आसीत् येन आगामि संततिभ्यः अभिनेतुः शब्दं पुनः परिभाषितवान्। श्रीधर्मेन्द्रः षष्ठ्यधिक ऊनविंशतिशततमे वर्षे चलचित्र-जगति पदार्पणं कृतवान्, तस्य बहुमुखी प्रतिभायाः कारणात् शीघ्रमेव सः सूपरस्टारः अभवत्। तेन स्वकीये जीवने त्रिशततोप्यधिकेषु चलचित्रेषु कार्याणि कृतानि। राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी पी राधाकृष्णन् वर्यः तथा प्रधानमन्त्री नरेन्द्रमोदी च वरिष्ठस्य अभिनेतुः पद्मभूषणपुरस्कारेण सम्मानितस्य धर्मेन्द्रवर्यस्य निधने शोकं प्रकटितवन्तः। सामाजिकान्तर्जालीये सन्देशे राष्ट्रपतिः मुर्मुः अवदत् यत्, वरिष्ठस्य अभिनेतुः मृत्युः भारतीयचलच्चित्रस्य महती क्षतिः अस्ति इति। प्रधानमन्त्रिणा धर्मेन्द्र-वर्यं प्रतीयमानं चलच्चित्र-व्यक्तित्वं, विलक्षणाभिनेता रूपेण च वर्णितं, येन प्रत्येकस्मिन् पात्रे मनोहारितां गभीरतां च आनीतम्। प्रधानमन्त्री अवदत् यत् धर्मेन्द्रवर्यस्य वैविध्यपूर्णं अभिनयं कोटिशः जनेषु प्रतिध्वनितम् आसीत्। केन्द्रीयमन्त्री अमितशाहः, राजनाथसिंहः, अश्विनी वैष्णवः च अभिनेतुः मृत्यौ शोकं प्रकटितवन्तः।

-----------------------------------------

**अयोध्या-प्रधानमन्त्री ध्वजः**

प्रधानमन्त्री नरेन्द्रमोदी श्वः उत्तरप्रदेशे अयोध्यायां श्रीरामजन्मभूमि मन्दिरं प्रति प्रस्थास्यति। श्रीमोदी तत्र सप्तमंदिरं गमिष्यति, यत्र महर्षिः वशिष्ठः, महर्षिः विश्वामित्रः, देवी अहिल्या, निषादराजः , माता शबरी च सर्वेषां मन्दिराणि सन्ति। ततः श्रीमोदी शेषावतार-मन्दिरस्य दर्शनं करिष्यति। प्रधानमन्त्री माता अन्नपूर्णा मन्दिरमपि गमिष्यति। ततः असौ राम-मन्दिरे, गर्भगृहे दर्शन-पूजार्चनां विधास्यति।

श्रीमोदी अयोध्यायां श्रीराम-जन्म-भूमि-मन्दिरस्य शिखिरे औपचारिक-रूपेण ध्वजम् उत्तोलयिष्यति। श्रीमोदी तत्र पथ-प्रदर्शनमपि विधास्यति। तदनन्तरं श्रीमोदी श्वः कुरुक्षेत्रं प्रति गमिष्यति। तत्रासौ गुरुतेग बहादुर-जी-वर्यस्य पञ्चाशदुत्तर-त्रिशत-तमीये हुतात्म-दिवासोपलक्ष्ये समायोजिते कार्यक्रमे अपि भागं ग्रहीष्यति। तत्र श्रीमोदी मुद्रायाः प्रैषचिटिकायाः च विमोचनमपि करिष्यति। गुरु तेग बहादुरजी वर्यस्य पञ्चाशदुत्तर-त्रिशत-तमे हुतात्मदिवसोपलक्ष्ये केन्द्र-प्रशासनम् वर्षात्मकं यावत् प्रचलिष्यमाणः स्मरणोत्सवः आमानयति।

---------------------------------------------

## रिजिजूः-भूटान

केन्द्रीयमन्त्री किरेन रिजिजू वर्यः अद्य भूटान्-देशस्य प्रधानमन्त्रिणा शेरिङ्ग् टोब्गे इत्यनेन सह मिलितवान्। सामाजिकान्तर्जालीये सन्देशे मन्त्रिणा उक्तं यत् उभयोः वार्तालापं भारत-भूटान्-मैत्री-गहनता, उभयोः देशयोः मूल्यानि च प्रतिबिम्बयन्ति। श्रीरिजीजूः अवदत् यत् भूटान-देशस्य पवित्र-बुद्ध-अवशेषान् प्रति श्रद्धा द्वयोः देशयोः जनानां मध्ये सौहार्दं सम्बन्धं च निरन्तरं प्रेरयति। मन्त्री अद्य भूटान्-देशं सम्प्राप्तवान्। सः भगवतः बुद्धस्य पवित्र-अवशेषानां प्रत्यागमनाय प्रतिनिधिदलस्य नेतृत्वं करोति। भूटान्-देशेन आयोजिते वैश्विक-शान्ति-प्रार्थना-महोत्सवस्य कृते विशेषरूपेण भारतेन आनीताः अवशेषाः प्रतिष्ठापिताः आसन्।

---------------------------------------------

## जीडीपी

स्टैण्डर्ड् एण्ड पूअर्स इत्यनया संस्थया वैश्विक-मूल्याङ्कने सम्भावना प्रकटिता यत् वर्तमान-वित्तीयवर्षे भारतस्य अर्थव्यवस्थायाः वृद्धिः पञ्चदशमलवोत्तर षट् प्रतिशतं, अग्रिम-वित्तीयवर्षे

सप्तदशमलवोत्तर षट् प्रतिशतं यावच्च भविष्यति। तेनोक्तं यत् अपेक्षित-कर-ह्रासः, मौद्रिक-नीतेः सरलीकरणेन च उपभोग-चलितवृद्धेः वृद्धिः भविष्यति इति। भारतस्य वास्तविकः जी. डी. पी. वर्तमानस्य वित्तवर्षस्य अप्रैल-जून-त्रैमासिके अष्टदशमलवोत्तर सप्त प्रतिशतं यावत् वृद्धेः अनुमानम् अस्ति, यत् पञ्च त्रैमासिकेषु द्रुततमः वृद्धिः अस्ति। भारतीय-रिजर्व्-बैङ्क् इत्यनेन सम्भावना प्रकटिता यत् अस्मिन् वर्षे जी. डी. पी. वृद्धिः अष्टदशमलवोत्तर षट् प्रतिशतं यावत् भविष्यति। यत् गतवित्तीयवर्षस्य पञ्चदशमलवोत्तर षट् प्रतिशतात् अधिकम् अस्ति।

------------------------------------------

**क्रिकेट्**

पुरुष-क्रिकेट्-क्रीडायाम् अद्य गुवाहाटी-नगरस्य बरसा-पारा-क्रिकेट्-क्रीडाङ्गणे द्वितीयान्तिम-निकष-क्रीडायाः तृतीय-दिने दक्षिण-आफ़्रिका-दलेन प्रथम-पार्याम् भारतीय दलं एकाधिक-द्विशत धावनांकेषु प्रत्यावर्तितम्।

------------------------------------------

**शूटिंग - स्वर्ण**

शूटिंग स्पर्धायाम् अद्य प्रांजलि प्रशान्त धूमल इत्यनया टोक्यो नगरे आयोजिते पञ्चविंशति-तमे डेफलिम्पिक्स प्रतियोगितायां स्वर्ण पदकं विजितम्।

।। इति वार्ताः ।।